# प्रतिदर्श प्रश्न-पत्र 2021-22 सत्र-एक

## विषय:संस्कृतम्

**कक्षा : आठवी (Session : 2021-22)**

**समय: 3 घंटे** **पूर्णांक : 100**

1. अधोलिखित गद्यांशयो: कस्मचिद् एकस्य गद्यांशस्य हिन्दी भाषायां अनुवादं विधीयन्ताम्। 5×1=5

(क) अध्यापिका- इमा: सप्तभगिन्य: स्वीये प्राचीनेतिहासे प्राय: स्वाधीना: [illegible]ष्टा:। न केनापि शासकेन इमा: स्वायत्तीकृता:। अनेक-संस्कृति विशिष्टायां भारतभूमौ एतासां भगिनीनां संस्कृति: महत्वाधायिनी इति। तन्वी-अयं शब्द: सर्वप्रथमं कदा प्रयुक्त:?

(ख) 476 तमे ख्रिस्ताब्दे (षट्सप्तत्यधिक चतु: शततमे वर्षे) आर्यभट: जन्म लब्धवानिति तेनैव विरचिते 'आर्यभटीयम् इत्यस्मिन् ग्रन्थे उल्लिखितम्। ग्रन्थोऽयं तेन त्रयोविंशतितमे वयसि विरचित:। ऐतिहासिक स्रोतोभि: ज्ञायते यत् पाटलिपुत्रं निकषा आर्यभटस्य वेधशाला आसीत्। अनेन इदम् अनुमीयते यत् तस्य कर्मभूमि:पाटलिपुत्रमेव आसीत्।'

2. अधोलिखित श्लोकेषु कयोश्चित् द्वयो:श्लोकयो: हिन्दी भाषायां अनुवादं क्रियन्ताम्-5×2=10

(क) अभिमानधना विनयोपेता, शालीना भारतजनताऽहम्।
कुलिशादपि कठिना कुसुमादपि, सुकुमारा भारतजनताऽहम्।।

(ख) कं सञ्जघान कृष्ण:? का शीतलवाहिनी गङ्गा?
के दारपोषणरता:? कं बलवन्तं न बाधते शीतम्?

(ग) मैत्री मे सहजा प्रकृतिरस्ति, नो दुर्बलताया:पर्याय:।
मित्रस्य चक्षुषा संसारं पश्यन्ती भारतजनताऽहम्।।



Downloaded from cclchapter.com

3. अधोलिखितम् अनुच्छेदं पठित्वा निर्दिष्ट प्रश्नानां उत्तराणि संस्कृत भाषायां दीयताम्।

आर्यभट्टस्य योगदानं गणित ज्योतिषा सम्बद्धं वर्तते। यत्र संख्यानाम् आकलनं महत्वम् आदधाति। आर्यभटःफलित ज्योतिषा शास्त्रे न विश्वसिति स्म। गणितीय पद्धत्या कृतम् आकलनमाधृत्य एव तेन प्रतिपादितं यद् ग्रहणे राहु केतु नामकौ दानवौ नास्ति कारणम् । तत्र तु सूर्यचन्द्रपृथिवी इति त्रीणि एव कारणानि। सूर्यं परितः भ्रमन्त्याः पृथिव्याः चन्द्रस्य परिक्रमापथेन संयोगाद् ग्रहणं भवति। यदा पृथिव्याः छायापातेन चन्द्रस्य प्रकाशः अवरुध्यते तदा चन्द्रग्रहणं भवति। तथैव पृथ्वीसूर्ययोः मध्ये समागतस्य चन्द्रस्य छायापातेन सूर्यग्रहणं दृश्यते। 1×5=5

एक पदेन उत्तरत–

1. आर्यभट्टः कस्मिन् न विश्वसिति स्म?
2. आर्यभट्टस्य योगदानं केन सम्बद्धम् अस्ति?
3. ग्रहणे कानि कारणानि भवन्ति?
4. चन्द्र ग्रहणं कदा भवति?
5. सूर्य ग्रहणं कदा दृश्यते?

4. पाठ्य पुस्तकं आधारीकृत्य कस्याश्चित् एकस्याः कथायाः सारं हिन्दी भाषायां लिखत– 5

(क) बिलस्य वाणी न कदापि में श्रुता (ख) कण्टकेनैव कण्टकम्

5. अधोलिखितेषु प्रश्नेषु केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत– 1×5=5

1. सूर्यः कस्यां दिशायाम् उदेति?
2. अस्माकं देशे कति राज्यानि सन्ति?
3. भगिनीसप्तके कानि राज्यानि सन्ति?
4. वंशवृक्षवस्तूनाम् उपयोगः कुत्र क्रियते?
5. आर्यभट्टेन कः ग्रन्थः रचितः?



Downloaded from cclchapter.com

6. प्रथमोपग्रहस्य नाम आर्यभट:इति कथम् कृतम्?
7. चन्द्रग्रहणं कथं भवति?

6. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत- (कोऽपि पञ्च) 1×5=5
   1. गुणा: गुणज्ञेषु गुणा: भवन्ति।
   2. लुब्धस्य यश: नश्यति।
   3. क्षुधार्त: सिंह: कुत्रापि आहारं न प्राप्तवान्।
   4. मानवा: वृक्षाणां छायायां विरमन्ति।
   5. सूर्य: पश्चिमायां दिशायाम् अस्तं गच्छति।
   6. प्रदेशेऽस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते।
   7. एतानि राज्यानि तु भ्रमणार्थं स्वर्गसदृशानि ।

7. मञ्जूषात: पदानि चित्वा रिक्त स्थानानि पूरयत। 1×5=5

   (नौकाम् पृथिवी तदा चला अस्तं)

   1. सूर्य: पूर्वदिशायाम् उदेति पश्चिमदिशायां च .............गच्छति।
   2. सूर्य: अचल: पृथिवी च ...............।
   3. ...........स्वकीये अक्षे घूर्णति।
   4. यदा पृथिव्या: छायापातेन चन्द्रस्य प्रकाश: अवरुध्यते ............. चन्द्रग्रहणं भवति।
   5. नौकायाम् उपविष्ट : मानव: ...............स्थिरामनु भवति।

8. संस्कृत पाठ्यपुस्तकम् आधारीकृत्य एकं श्लोकं अर्थ सहितं लिखत्, य: अस्मिन् प्रश्न-पत्रे न भवेत्। 3+2=5

9. प्रदत्तेभ्य:विकल्पेभ्य: उचित शब्द रूपं विचित्य लिखत। 1×5=5
   1. राम शब्द:, षष्ठी विभक्ति: द्विवचनम्।

      (1) रामस्य (2) रामाभ्याम्

      (3) रामयो: (4) रामाणाम्



Downloaded from cclchapter.com

2. लता शब्दः, प्रथमा विभक्तिः, एकवचनम्।

(1) लताः (2) लता

(3) लते (4) लताम्

3. मुनि शब्दः, सप्तमी विभक्तिः, बहुवचनम्।

(1) मुन्योः (2) मुनीषु

(3) मुनीनाम् (4) मुनिषु

4. पितृ शब्दः, चतुर्थी विभक्तिः द्विवचनम्।

(1) पितृभ्याम् (2) पिताभ्याम्

(3) पितृभ्यः (4) पिताभ्यः

5. युष्मद् शब्दः, तृतीया विभक्तिः, एकवचनम्।

(1) तव (2) त्वया

(3) मया (4) त्वाम्

10. प्रदत्तेभ्यः विकल्पेभ्यः धातूनां यथानिर्दिष्ट-धातुरूपं विचित्य लिखतः- 5

1. भू धातुः, लट्लकारः, प्रथम-पुरुषः बहुवचनम्।

(1) भवति (2) भवतः

(3) भवन्ति (4) भून्ति

2. दृश धातुः, लृट्लकारः मध्यम पुरुषः, एकवचनम्।

(1) द्रक्ष्यसि (2) पश्यसि

(3) स्थास्यसि (4) दृश्यसि

3. खाद् धातुः, लोट्लकारः, उत्तम-पुरुषः, द्विवचनम्।

(1) खादावः (2) खादाव

(3) अखादाव (4) खादतम्



Downloaded from cclchapter.com

4. लिख् धातु:, लङ्लकार:, प्रथम-पुरुष:, एकवचनम्।

(1) अलिखत (2) अलिखन्

(3) अलिखम् (4) अलिखत्

5. स्था धातु: लट् लकार:, उत्तम-पुरुष: बहुवचनम्।

(1) पश्याम: (2) स्थास्याम:

(3) तिष्ठाम: (4) पिबाम:

11. प्रदत्तेभ्य: विकल्पेभ्य: समुचितं विकल्पं विचित्य सन्धिपदं सन्धिविच्छेदपदं वा चिनुत। 5

(क) 'सहसैव'

(1) सहसै+व (2) सहसा+एव

(3) सहसा+ऐव (4) सह+सैव

(ख) 'प्रवृत्तोऽपि'

(1) प्रवृत्त:+अपि (2) प्रवृत्ता+अपि

(3) प्रवृत्तो+पि (4) प्र + वृत्तोऽपि

(ग) 'विनय + उपेता '

(1) विनयउपेता (2) विनयापेता

(3) विनयोपेता (4) विनयेपेता

(घ) 'अद्य+अपि'

(1) अद्यअपि (2) अद्यपि

(3) अद्योपि (4) अद्यापि

(ङ) 'इत्यस्मिन'

(1) इती + अस्मिन् (2) इति + अस्मिन्

(3) इत्य + अस्मिन् (4) इत् + यस्मिन्



Downloaded from cclchapter.com

12. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं विकल्पं विचित्य संख्यात्मक अङ्कान् लिखत। 1×5=5

(क) 18

(1) अष्टाविंशतिः (2) अष्टादश

(3) अष्टात्रिंशत् (4) अष्टौ

(ख) 30

(1) त्रिशंत् (2) त्रिंशतः

(3) त्रयोदश (4) त्रयस्त्रिंशत्

(ग) 48

(1) अष्टचत्वारिंशत् (2) अष्टात्रिंशत्

(3) अष्टपञ्चाशत् (4) चत्वारिंशत्-अष्ट

(घ) 90

(1) नव (2) नवदश

(3) नवतीः (4) नवतिः

(ङ) 75

(1) पञ्चसप्ततिः (2) पञ्चसप्तिः

(3) पञ्चासप्ततिः (4) पञ्चाशीतिः

13. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं विकल्पं चित्वा प्रकृति-प्रत्ययविभागं संयोजनं च कुरुत। 1×5=5

(क) गन्तुम्

(1) गम् + तुमुन् (2) गम् + तुमुन

(3) गम + तुमुन् (4) गम + तुमुन

(ख) कृत्वा

(1) कृ + कत्वा (2) कृ - क्त्वा

(3) कृ + कृत्वा (4) कृत्वा



Downloaded from cclchapter.com

(ग) सम् + पूज् + ल्यप्।

(1) समपूजल्य (2) सम्पूल्य

(3) सम्पूज्य (4) सम्पूजल्य

(घ) त्यज् + क्त्वा।

(1) त्यजत्वा (2) त्यज्त्वा

(3) त्यक्त्वा (4) व्यक्त्वा

(ङ) हृ + तुमुन्

(1) हर्तुम् (2) हतुम्

(3) हरितुम् (4) हरतुम्

14. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं पदपरिचयं चिनुत- 1×5=5

(क) 'रामेण'

(1) राम शब्दः, पञ्चमी विभक्तिः, एकवचनम्

(2) राम शब्दः, द्वितीया विभक्तिः, बहुवचनम्

(3) रमा शब्दः, तृतीया विभक्तिः, एकवचनम्

(4) राम शब्दः, तृतीया विभक्तिः एकवचनम्

(ख) 'नद्यः'

(1) नदी शब्दः, प्रथमा विभक्तिः, एकवचनम्

(2) नदी शब्दः, प्रथमा विभक्तिः, बहुवचनम्

(3) नदी शब्दः, पञ्चमी विभक्तिः, एकवचतनम्

(4) नदी शब्दः, द्वितीया विभक्तिः, बहुवचनम्

(ग) 'मातुः'

(1) मातृ शब्दः, षष्ठी विभक्तिः, एकवचनम्।

(2) मातृ शब्दः, चतुर्थी विभक्तिः, एकवचनम्।



Downloaded from cclchapter.com

(3) मातृ शब्दः, द्वितीया-विभक्तिः, एकवचनम्।

(4) मातु शब्दः, प्रथमा विभक्तिः, एकवचनम्।

(घ) 'अनमत'

(1) नम्-लङ्- प्रथम - एकवचनम्

(2) नम् - लङ् - प्रथम - बहुवचनम्

(3) नम् - लङ् - मध्यम - बहुवचनम्

(4) नम् - लोट् - मध्यम - बहुवचनम्

(ङ) 'पक्ष्यसि'

(1) पच् धातुः- लृट्-मध्यम-एकवचनम्

(2) पक्ष् धातुः - लृट्-मध्यम-एकवचनम्

(3) पक्ष् धातुः- लट्- मध्यम - एकवचनम्

(4) पच् धातुः- लट् - मध्यम - एकवचनम्

15. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं लकारपरिवर्तनं चिनुत- 1×5=5

(क) ''रामः गच्छति'' (लृट्लकारे परिवर्तयत)

(1) रामः अगच्छत् (2) रामः गच्छतु

(3) रामः गच्छेत् (4) रामः गमिष्यति

(ख) त्वं किं अलिखः? (लट् लकारे)

(1) त्वं किं लिखसि? (2) त्वं किं अलिखेः?

(3) त्वं किं अलिखः? (4) त्वं किं लेखिष्यसि?

(ग) अहं स्थास्यामि। (लोट्लकारे परिवर्तयत)

(1) अहं तिष्ठामि। (2) अहं तिष्ठानि।

(3) अहं अतिष्ठम्। (4) अहं तिष्ठेयम्।



Downloaded from cclchapter.com

(घ) वयं गृहं गच्छाम। (लङ्लकारे)

(1) वयं गृहं गच्छामः।  (2) वयं गृहं अगच्छाम।

(3) वयं गृहं गमिष्यामः।  (4) वयं गृहं गच्छेम।

(ङ) ते पठन्ति। (लोट्लकारे)

(1) ते पठिष्यन्ति।  (2) ते पठन्तु।

(3) ते अपठन्।  (4) ते पठेयुः।

16. निर्देशानुसारम् प्रश्नानामुत्तराणि लिखत- 2×6=12

(क) विलोमपदानि योजयत-

| | |
|---|---|
| जायते | शान्ता |
| वीरः | विद्वद्भिः |
| अशान्ता | कातरः |
| मूर्खैः | म्रियते |

(ख) भिन्नप्रकृतिकं पदं चिनुत-

(1) गच्छति,पठति, धावति, अहसत, क्रीडति।

(2) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः।

(3) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्।

(4) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा

(ग) उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं न इति लिखत-

(1) कातरो युद्धे युद्ध्यते।  (2) कस्तूरी मृगात् जायते।

(3) कंसः जघान् , कृष्णम्।  (4) जयन्तः कृष्णस्य पुत्रः।

(घ) समानार्थकपदं चित्वा लिखत-

(1) करिणाम् ............। (अश्वानाम्/गजानाम्/गर्दभानाम्)

(2) अभूत..............। (अचलत्/अहसत्/अभवत्)



Downloaded from cclchapter.com

(3) बुध्यते ............ । (लिख्यते/अवगम्यते/पठ्यते)

(4) घटः ........... । (तडागः/ नलः/ कुम्भः)

(ङ) श्लोकांशान योजयत-

| (क) | (ख) |
|---|---|
| 1. किं कुर्यात कातरो युद्धे | अत्रैवोक्तं न बुध्यते |
| 2. विद्वद्भिः का सदा वन्द्या | तक्रं शक्रस्य दुर्लभम् |
| 3. के सञ्जधान कृष्णः | मृगात सिंहः पलायते |
| 4. कथं विष्णुपदं प्रोक्तं | काशीतलवाहिनी गङ्गा |

(च) विशेष्य-विशेषणानाम् उचितं मेलनं कुरुत-

| विशेष्य-पदानि | विशेषण-पदानि |
|---|---|
| अयम् | संस्कृतिः |
| संस्कृतिविशिष्टायाम् | इतिहासे |
| महत्त्वाधायिनी | प्रदेशः |
| प्राचीने | समवायः |
| एकः | भारतभूमौ |

17. अधोलिखितेषु तद्भव-पदानां कृते संस्कृत पदानि लिखत- ½×6=3

| तद्भव-पदानि | संस्कृत-पदानि |
|---|---|
| बहिन | ............... |
| संगठन | ............... |
| बाँस | ............... |
| आज | ............... |
| सप्त | ............... |
| खेत | ............... |



Downloaded from cclchapter.com

18. निर्देशानुसारं उत्तरत लिखत- 1×5=5

(क) 'अहम' इति पदस्य कः अर्थः?

(1) मैं (2) तुम (3) वह (4) तू

(ख) 'पठन्ति' इत्यत्र कः लकारः?

(1) लट् लकारः (2) लोट लकारः (3) लङ्लकार (4) लृट् लकारः

(ग) 'रामाः' इत्यत्र का विभक्ति?

(1) प्रथमा (2) द्वितीया (3) सप्तमी (4) चतुर्थी

(घ) संस्कृते कति लिङ्गानि सन्ति?

(1) पञ्च (2) द्वौ (3) त्रीणि (4) सप्त

(ङ) 'लट्' लकारस्य पदम् चिनुत-

(1) पठतु (2) चलति (3) अहसत (4) भविष्यति



Downloaded from cclchapter.com